## लळितासहस्रनामं

*ओं*
*ओं ऐं ह्रीं श्रीं*
*अस्य श्री लळिता सहस्रनाम स्तोत्र महामन्त्रस्य*
*वशिन्यादि वाग्देवता ऋषयः अनुष्टुप् चन्दः*
*श्री लळिता परमेश्वरी देवता श्रीमद् वाग्भव–*
*कुटेतिबीजं मध्यकूटेति शक्तिः शक्तिन्यासं करन्यासन्ञ्च कुर्यत् मम*
*श्री लळिता परमेश्वरी प्रसाद सिध्य्र्त्थे जपे विनियोगः*

## ध्यानं

सिन्दूरारुण विग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्–
तारानायक शेखरां स्मितमुखिं आपीनवक्षोरुहां
पाणिभ्यामळिपूर्ण्णरत्नचषकं रक्तोत्पलं बिभ्रतिं
सौम्यां रत्नघटस्थरक्तचरणां ध्यायेत् परामंबिकां

ध्यायेत् पद्मासनस्थां विकसित वदनां पद्मपत्रायताक्षिं
हेमांभां पीतवस्त्रां करकलितलसत् हेमपद्मां वरांगीं
सर्व्वालङ्कारयुक्तां सततमभयदां भक्तनम्रां भवानीं
श्रीविद्यां शान्तमूर्त्तिं सकल सुरनुतां सर्वसन्पत् प्रदात्रिं

सकुङ्कमविलेपनामळिकचुंबिकस्तुरिकां
समन्दहसितेक्षणां सशरचापपाशाङ्कुशां
अशेषजनमोहीनीमरुणमाल्यभूषांबरां
जपाकुसुमभासुरां जपविधौ स्मरेदंबिकां

अरुणां करुणातरङ्गिताक्षिं
धृतपाशान्ङ्कुश पुष्पबाणचापां
अणिमादिभिरावृतां मयूखै
रहमित्येव विभावये भवानिं

## मूलमन्त्रं

ओं ह्रीं लळितांबिकायै नमः
क ऐ इ ल ह्रीं
ह स क ह ल ह्रीं
स क ल ह्रीं

## सहस्र नामावलि

ओं श्रीमात्रे नमः
ओं श्रीमहाराज्ञ्यै नमः
ओं श्रीमत्सिंहासनेश्वर्यै नमः
ओं चिदग्निकुण्ठसंभूतायै नमः
ओं देवकार्यसमुद्यतायै नमः
ओं उद्यद्भानुसहस्राभायै नमः
ओं चतुर्बाहुसमन्वितायै नमः
ओं रागस्वरूपपाशाढ्यायै नमः
ओं क्रोधाकाराङ्कुशोज्वलायै नमः
ओं मनोरूपेक्षुकोदण्डायै नमः 10
ओं पञ्चतन्मात्रसायकायै नमः
ओं निजारुणप्रभापूरमज्जत्ब्रह्माण्डमण्डलायै नमः
ओं चन्पकाशोकपुन्नागसौगन्धिकलसत्कचायै नमः
ओं कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डितायै नमः
ओं अष्टमीचन्द्रविभ्राजदळिकस्थलशोभितायै नमः
ओं मुखचन्द्रकळङ्काभमृगनाभिविशेषकायै नमः
ओं वदनस्मरमांगल्यगृहतोरणचिल्लिकायै नमः
ओं वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचनायै नमः
ओं नवचन्पकपुष्पाभनासादण्डविराजितायै नमः
ओं ताराकान्तितिरस्कारिनासाभरणभासुरायै नमः 20
ओं कदंबमञ्जरीक्नुप्तकर्ण्णपूरमनोहरायै नमः
ओं ताटङ्कयुगळीभूततपनोडुपमण्डलायै नमः
ओं पद्मरागशिलादर्शपरिभाविकपोलभुवे नमः
ओं नवविद्रुमबिंबश्रीन्यक्कारिरदनच्छदायै नमः
ओं शुद्धविद्याङ्कुराकारद्विजपङ्क्तिद्वयोज्ज्वलायै नमः
ओं कर्प्पूरवीटिकामोदसमाकर्षद्दिगन्तरायै नमः
ओं निजसल्लापमाधुर्यविनिर्भत्सितकच्छप्यै नमः

ओं मन्दस्मितप्रभापूरमज्जत्कामेशमानसायै नमः
ओं अनाकलितसादृश्यचुबुकश्रीविराजितायै नमः
ओं कामेशबद्धमांगल्यसूत्रशोभितकन्धरायै नमः 30
ओं कनकांगदकेयूरकमनीयभुजान्वितायै नमः
ओं रत्नग्रैवेयचिन्ताकलोलमुक्ताफलान्वितायै नमः
ओं कामेश्वरप्रेमरत्नमणिप्रतिपणस्तन्यै नमः
ओं नाभ्यालवालरोमाळिलताफलकुचद्वयायै नमः
ओं लक्ष्यरोमलताधारतासमुन्नेयमध्यमायै नमः
ओं स्तनभारदळन्मध्यपबन्धवलित्रयायै नमः
ओं अरुणारुणकौसुंभवस्त्रभास्वत्कटीतट्यै नमः
ओं रत्नकिंकिणिकारम्यरशनादामभूषितायै नमः
ओं कामेशज्ञातसौभाग्यमार्द्ववोरुद्वयान्वितायै नमः
ओं माणिक्यमकुटाकारजानुद्वयविराजितायै नमः 40
ओं इन्द्रगोपपरिक्षिप्तस्मरतूणाभजंखिकायै नमः
ओं गूडगुल्फायै नमः
ओं कूर्म्मपृष्ठजयिष्णुप्रपदान्वितायै नमः
ओं नखदीधितिसंछन्ननमज्जनतमोगुणायै नमः
ओं पदद्वयप्रभाजालपराकृतसरोरुहायै नमः
ओं शिञ्जानमणिमञ्जीरमण्डितश्रीपदांबुजायै नमः
ओं मराळीमन्दगमनायै नमः
ओं महालावण्यशेवधये नमः
ओं सर्व्वारुणायै नमः
ओं अनवद्यांग्यै नमः 50
ओं सर्व्वाभरणभूषितायै नमः
ओं शिवकामेश्वराङ्कस्थायै नमः
ओं शिवायै नमः
ओं स्वाधीनवल्लभायै नमः
ओं सुमेरुमद्ध्यशृंगस्थायै नमः
ओं श्रीमन्नगरनायिकायै नमः
ओं चिन्तामणिगृहान्तस्थायै नमः
ओं पञ्चब्रह्मासनस्थितायै नमः
ओं महापद्माटवीसंस्थायै नमः
ओं कदंबवनवासिन्यै नमः 60
ओं सुधासागरमध्यस्थायै नमः
ओं कामाक्ष्यै नमः
ओं कामदायिन्यै नमः
ओं देवर्षिगणसंघातस्तूयमानात्मवैभवायै नमः

ओं भण्डासुरवधोद्युक्तशक्तिसेनासमन्वितायै नमः
ओं संपत्करीसमारुढसिन्धुरव्रजसेवितायै नमः
ओं अश्वारूढाधिष्ठिताश्वकोटिकोटिभिरावृतायै नमः
ओं चक्रराजरथारूढसर्‌व्वायुधपरिष्कृतायै नमः
ओं गेयचक्ररथारूढमन्त्रिणीपरिसेवितायै नमः
ओं किरिचक्ररथारूढदण्डनाथापुरस्कृतायै नमः 70
ओं ज्वालामालिनिकाक्षिप्तवह्निप्राकारमध्यगायै नमः
ओं भण्डसैन्यवधोद्युक्तशक्तिविक्रमहर्‌षितायै नमः
ओं नित्यापराक्रमाटोपनिरीक्षणसमुत्सुकायै नमः
ओं भण्डपुत्रवधोद्युक्तबालाविक्रमनन्दितायै नमः
ओं मान्त्रिण्यंबाविरचितविषंगवधतोषितायै नमः
ओं विशुक्रप्राणहरणवाराहीवीर्यनन्दितायै नमः
ओं कामेश्वरमुखालोककल्पितश्रीगणेश्वरायै नमः
ओं महागणेशनिर्‌भिन्नविघ्नयन्त्रप्रहर्‌षितायै नमः
ओं भण्डासुरेन्द्रनिर्‌म्मुक्तशस्त्रप्रत्यस्त्रवर्‌षिण्यै नमः
ओं करांगुलीनखोत्पन्ननारायणदशाकृत्यै नमः 80
ओं महापाशुपतास्त्राग्निनिर्‌द्दग्धासुरसैनिकायै नमः
ओं कामेश्वरास्त्रनिर्‌द्दग्द्धसभण्डासुरशून्यकायै नमः
ओं ब्रह्मोपेन्द्रमहेन्द्रादिदेवसंस्तुतवैभवायै नमः
ओं हरनेत्राग्निसंदग्द्धकामसञ्जीवनौषध्यै नमः
ओं श्रीमद्वाग्भवकुटैकस्वरूपमुखपङ्कजायै नमः
ओं कण्ठाधःकटिपर्यन्तमध्यकूटस्वरूपिण्यै नमः
ओं शक्तिकूटैकतापन्नकव्यधोभागधारिण्यै नमः
ओं मूलमन्त्रात्मिकायै नमः
ओं मूलकूटत्रयकळेबरायै नमः
ओं कुळामृतैकरसिकायै नमः 90
ओं कुळसङ्केतपालिन्यै नमः
ओं कुलांगनायै नमः
ओं कुलान्तस्थायै नमः
ओं कौलिन्यै नमः
ओं कुलयोगिन्यै नमः
ओं अकुलायै नमः
ओं समयान्तस्थायै नमः
ओं समयाचारतत्परायै नमः
ओं मूलाधारैकनिलयायै नमः
ओं ब्रह्मग्रन्थिविभेदिन्यै नमः 100
ओं मणिपूरान्तरुदितायै नमः

ओं विष्णुग्रन्थिविभेदिन्यै नमः
ओं आज्ञाचक्रान्तरालस्थायै नमः
ओं रुद्रग्रन्थिविभेदिन्यै नमः
ओं सहस्रारांबुजारूढायै नमः
ओं सुधासाराभिवर्षिण्यै नमः
ओं तटिल्लतासमरुच्यै नमः
ओं षट्चक्रोपरिसंस्थितायै नमः
ओं महासक्त्यै नमः
ओं कुण्डलिन्यै नमः 110
ओं बिसतन्तुतनीयस्यै नमः
ओं भवान्यै नमः
ओं भावनागम्यायै नमः
ओं भवारण्यकुठारिकायै नमः
ओं भद्रप्रियायै नमः
ओं भद्रमूर्त्त्यै नमः
ओं भक्तसौभाग्यदायिन्यै नमः
ओं भक्तिप्रियायै नमः
ओं भक्तिगम्यायै नमः
ओं भक्तिवश्यायै नमः 120
ओं भयापहायै नमः
ओं शांभव्यै नमः
ओं शारदाराध्यायै नमः
ओं शर्वाण्यै नमः
ओं शर्म्मदायिन्यै नमः
ओं शांकर्यै नमः
ओं श्रीकर्यै नमः
ओं साद्ध्यै नमः
ओं शरच्चन्द्रनिभाननायै नमः
ओं शातोदर्यै नमः 130
ओं शान्तिमत्यै नमः
ओं निराधारायै नमः
ओं निरञ्जनायै नमः
ओं निर्लेपायै नमः
ओं निर्म्मलायै नमः
ओं नित्यायै नमः
ओं निराकारायै नमः
ओं निराकुलायै नमः

ओं निर्गुणायै नमः
ओं निष्कळायै नमः 140
ओं शान्तायै नमः
ओं निष्कामायै नमः
ओं निरुपप्लवायै नमः
ओं नित्यमुक्तायै नमः
ओं निर्व्विकारायै नमः
ओं निष्प्रपञ्चायै नमः
ओं निराश्रयायै नमः
ओं नित्यशुद्धायै नमः
ओं नित्यबुद्धायै नमः
ओं निरवद्यायै नमः 150
ओं निरन्तरायै नमः
ओं निष्कारणायै नमः
ओं निष्कळङ्कायै नमः
ओं निरुपाधयै नमः
ओं निरीश्वरायै नमः
ओं नीरागायै नमः
ओं रागमथनायै नमः
ओं निर्म्मदायै नमः
ओं मदनाशिन्यै नमः
ओं निश्चिन्तायै नमः 160
ओं निरहङ्कारायै नमः
ओं निर्म्मोहायै नमः
ओं मोहनाशिन्यै नमः
ओं निर्म्ममायै नमः
ओं ममताहन्त्र्यै नमः
ओं निष्पापायै नमः
ओं पापनाशिन्यै नमः
ओं निष्क्रोधायै नमः
ओं क्रोधशमन्यै नमः
ओं निर्लोभायै नमः 170
ओं लोभनाशिन्यै नमः
ओं निस्संशयायै नमः
ओं संशयघ्न्यै नमः
ओं निर्भवायै नमः
ओं भवनाशिन्यै नमः

ओं निर्विकल्पायै नमः
ओं निराबाधायै नमः
ओं निर्भेदायै नमः
ओं भेदनाशिन्यै नमः
ओं निर्नाशायै नमः 180
ओं मृत्युमथन्यै नमः
ओं निष्क्रियायै नमः
ओं निष्परिग्रहायै नमः
ओं निस्तुलायै नमः
ओं नीलचिकुरायै नमः
ओं निरपायायै नमः
ओं निरत्ययायै नमः
ओं दुर्ल्लभायै नमः
ओं दुर्गमायै नमः
ओं दुर्गायै नमः 190
ओं दुखहन्त्र्यै नमः
ओं सुखप्रदायै नमः
ओं दुष्टदूरायै नमः
ओं दुराचारशमन्यै नमः
ओं दोषवर्ज्जितायै नमः
ओं सर्व्वज्ञायै नमः
ओं सान्द्रकरुणायै नमः
ओं समानाधिकवर्ज्जितायै नमः
ओं सर्व्वशक्तिमयै नमः
ओं सर्व्वमंगळायै नमः 200
ओं सद्गतिप्रदायै नमः
ओं सर्वेश्वर्यै नमः
ओं सर्वमय्यै नमः
ओं सर्व्वमन्त्रस्वरूपिण्यै नमः
ओं सर्व्वयन्त्रात्मिकायै नमः
ओं सर्व्वतन्त्ररूपायै नमः
ओं मनोन्मन्यै नमः
ओं माहेश्वर्यै नमः
ओं महादेव्यै नमः
ओं महालक्ष्म्यै नमः 210
ओं मृडप्रियायै नमः
ओं महारूपायै नमः

ओं महापूज्यायै नमः
ओं महापातकनाशिन्यै नमः
ओं महामायायै नमः
ओं महासत्वायै नमः
ओं महश्शक्त्यै नमः
ओं महारत्यै नमः
ओं महाभोगायै नमः
ओं महैश्वर्यायै नमः 220
ओं महावीर्यायै नमः
ओं महाबलायै नमः
ओं महाबुद्ध्यै नमः
ओं महासिद्ध्यै नमः
ओं महायोगेश्वरेश्वर्यै नमः
ओं महातन्त्रायै नमः
ओं महामन्त्रायै नमः
ओं महायन्त्रायै नमः
ओं महासनायै नमः
ओं महायागक्रमाराध्यायै नमः 230
ओं महभैरवपूजितायै नमः
ओं महेश्वरमहाकल्पमहाताण्डवसाक्षिण्यै नमः
ओं महाकामेशमहिष्यै नमः
ओं महात्रिपुरसुन्दर्यै नमः
ओं चतुःषष्ट्युपचाराढ्यायै नमः
ओं चतुःषष्टिकलामय्यै नमः
ओं महाचतुःषष्टिकोटियोगिनीगणसेवितायै नमः
ओं मनुविद्यायै नमः
ओं चन्द्रविद्यायै नमः
ओं चन्द्रमण्डलमध्यगायै नमः 240
ओं चारुरूपायै नमः
ओं चारुहासायै नमः
ओं चारुचन्द्रकलाधरायै नमः
ओं चराचरजगन्नाथायै नमः
ओं चक्रराजनिकेतनायै नमः
ओं पार्वत्यै नमः
ओं पद्मनयनायै नमः
ओं पद्मरागसमप्रभायै नमः
ओं पञ्चप्रेतासनासीनायै नमः

ओं पञ्चब्रह्मस्वरूपिण्यै नमः 250
ओं चिन्मयै नमः
ओं परमानन्दायै नमः
ओं विज्ञानघनरूपिण्यै नमः
ओं ध्यानध्यातृध्येयरूपायै नमः
ओं धर्म्माधर्म्मविवर्ज्जितायै नमः
ओं विश्वरूपायै नमः
ओं जागरिण्यै नमः
ओं स्वपन्त्यै नमः
ओं तैजसात्मिकायै नमः
ओं सुप्तायै नमः 260
ओं प्रज्ञात्मिकायै नमः
ओं तुर्यायै नमः
ओं सर्वावस्थाविवर्ज्जितायै नमः
ओं सृष्टिकर्त्र्यै नमः
ओं ब्रह्मरूपायै नमः
ओं गोप्त्र्यै नमः
ओं गोविन्दरूपिण्यै नमः
ओं संहारिण्यै नमः
ओं रुद्ररूपायै नमः
ओं तिरोधानकर्यै नमः 270
ओं ईश्वर्यै नमः
ओं सदाशिवायै नमः
ओं अनुग्रहदायै नमः
ओं पञ्चकृत्यपरायणायै नमः
ओं भानुमण्डलमध्यस्थायै नमः
ओं भैरव्यै नमः
ओं भगमालिन्यै नमः
ओं पद्मासनायै नमः
ओं भगवत्यै नमः
ओं पद्मनाभसहोदर्यै नमः 280
ओं उन्मेषनिमिषोत्पन्नविपन्नभुवनावल्यै नमः
ओं सहस्रशीर्षवदनायै नमः
ओं सहस्राक्ष्यै नमः
ओं सहस्रपादे नमः
ओं आब्रह्मकीटजनन्यै नमः
ओं वर्ण्णाश्रमविधायिन्यै नमः

ओं निजाज्ञारूपनिगमायै नमः
ओं पुण्यापुण्यफलप्रदायै नमः
ओं श्रुतिसीमन्तसिन्दूरीकृतपदाब्जधूळिकायै नमः
ओं सकलागमसन्दोहशुक्तिसन्पुटमौक्तिकायै नमः 290
ओं पुरुषार्त्थप्रदायै नमः
ओं पूर्ण्णायै नमः
ओं भोगिन्यै नमः
ओं भुवनेश्वर्यै नमः
ओं अंबिकायै नमः
ओं अनादिनिधनायै नमः
ओं हरिब्रह्मेन्द्रसेवितायै नमः
ओं नारायण्यै नमः
ओं नादरूपायै नमः
ओं नामरूपविवर्ज्जितायै नमः 300
ओं ह्रींकार्यै नमः
ओं ह्रीमत्यै नमः
ओं हृद्यायै नमः
ओं हेयोपादेयवर्ज्जितायै नमः
ओं राजराजार्च्चितायै नमः
ओं राज्ञ्यै नमः
ओं रम्यायै नमः
ओं राजीवलोचनायै नमः
ओं रञ्जन्यै नमः
ओं रमण्यै नमः 310
ओं रस्यायै नमः
ओं रणत्किङ्किणिमेखलायै नमः
ओं रमायै नमः
ओं राकेन्दुवदनायै नमः
ओं रतिरूपायै नमः
ओं रतिप्रियायै नमः
ओं रक्षाकर्यै नमः
ओं राक्षसघ्न्यै नमः
ओं रामायै नमः
ओं रमणलन्पटायै नमः 320
ओं काम्यायै नमः
ओं कामकलारूपायै नमः
ओं कदंबकुसुमप्रियायै नमः

ओं कल्याण्यै नमः
ओं जगतीकन्दायै नमः
ओं करुणारससागरायै नमः
ओं कलावत्यै नमः
ओं कलालापायै नमः
ओं कान्तायै नमः
ओं कादंबरीप्रियायै नमः 330
ओं वरदायै नमः
ओं वामनयनायै नमः
ओं वारुणीमदविह्वलायै नमः
ओं विश्वाधिकायै नमः
ओं वेदवेद्यायै नमः
ओं विन्ध्याचलनिवासिन्यै नमः
ओं विधात्र्यै नमः
ओं वेदजनन्यै नमः
ओं विष्णुमायायै नमः
ओं विलासिन्यै नमः 340
ओं क्षेत्रस्वरूपायै नमः
ओं क्षेत्रेश्यै नमः
ओं क्षेत्रक्षेत्रज्ञपालिन्यै नमः
ओं क्षयवृद्धिविनिर्मुक्तायै नमः
ओं क्षेत्रपालसमर्च्चितायै नमः
ओं विजयायै नमः
ओं विमलायै नमः
ओं वन्द्यायै नमः
ओं वन्दारुजनवत्सलायै नमः
ओं वाग्वादिन्यै नमः 350
ओं वामकेश्यै नमः
ओं वह्निमण्डलवासिन्यै नमः
ओं भक्तिमत्कल्पलतिकायै नमः
ओं पशुपाशविमोचिन्यै नमः
ओं संहृताशेषपाषण्डायै नमः
ओं सदाचारप्रवर्त्तिकायै नमः
ओं तापत्रयाग्निसन्तप्तसमाह्लादनचन्द्रिकायै नमः
ओं तरुण्यै नमः
ओं तापसाराध्यायै नमः
ओं तनुमद्ध्यायै नमः 360

ओं तमोपहायै नमः
ओं चित्यै नमः
ओं तत्पदलक्ष्यार्त्थायै नमः
ओं चिदेकरस्वरूपिण्यै नमः
ओं स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्तत्यै नमः
ओं परायै नमः
ओं प्रत्यक्चितीरूपायै नमः
ओं पश्यन्त्यै नमः
ओं परदेवतायै नमः
ओं मध्यमायै नमः 370
ओं वैखरीरूपायै नमः
ओं भक्तमानसहंसिकायै नमः
ओं कामेश्वरप्राणनाड्यै नमः
ओं कृतज्ञायै नमः
ओं कामपूजितायै नमः
ओं शृंगाररससन्पूर्ण्णायै नमः
ओं जयायै नमः
ओं जालन्धरस्थितायै नमः
ओं ओढ्याणपीठनिलयायै नमः
ओं बिन्दुमण्डलवासिन्यै नमः 380
ओं राहोयागक्रमाराध्यये नमः
ओं रहस्तर्प्पणतर्प्पितायै नमः
ओं सद्यःप्रसादिन्यै नमः
ओं विश्वसाक्षिण्यै नमः
ओं साक्षिवर्ज्जितायै नमः
ओं षडंगदेवतायुक्तायै नमः
ओं षाड्गुण्यपरिपूरितायै नमः
ओं नित्यक्लिन्नायै नमः
ओं निरुपमायै नमः
ओं निर्व्वाणसुखदायिन्यै नमः 390
ओं नित्यषोडशिकारूपायै नमः
ओं श्रीकण्ठार्द्धशरीरिण्यै नमः
ओं प्रभावत्यै नमः
ओं प्रभारूपायै नमः
ओं प्रसिद्धायै नमः
ओं परमेश्वर्यै नमः
ओं मूलप्रकृत्यै नमः

ओं अव्यक्तायै नमः
ओं व्यक्ताव्यक्तस्वरूपिण्यै नमः
ओं व्यापिन्यै नमः 400
ओं विविधाकारायै नमः
ओं विद्याविद्यास्वरूपिण्यै नमः
ओं महाकामेशनयनकुमुदाह्लादकौमुद्यै नमः
ओं भक्तहार्द्दतमोभेदभानुमद्भानुसन्तत्यै नमः
ओं शिवदूत्यै नमः
ओं शिवाराध्यायै नमः
ओं शिवमूर्त्यै नमः
ओं शिवंकर्यै नमः
ओं शिवप्रियायै नमः
ओं शिवपरायै नमः 410
ओं शिष्टेष्टायै नमः
ओं शिष्टपूजितायै नमः
ओं अप्रमेयायै नमः
ओं स्वप्रकाशायै नमः
ओं मनोवाचामगोचरायै नमः
ओं चिच्छक्त्यै नमः
ओं चेतनारूपायै नमः
ओं जडशक्त्यै नमः
ओं जडात्मिकायै नमः
ओं गायत्र्यै नमः 420
ओं व्याहृत्यै नमः
ओं सन्ध्यायै नमः
ओं द्विजवृन्दनिषेवितायै नमः
ओं तत्त्वासनायै नमः
ओं तस्म्यै नमः
ओं तुभ्यं नमः
ओं अय्यै नमः
ओं पञ्चकोशान्तरस्थितायै नमः
ओं निस्सीममहिम्ने नमः
ओं नित्ययौवनायै नमः 430
ओं मदशालिन्यै नमः
ओं मदघूर्ण्णितरक्ताक्ष्यै नमः
ओं मदपाटलगण्डभुवे नमः
ओं चन्दनद्रवदिग्धांग्यै नमः

ओं चान्पेयकुसुमप्रियायै नमः
ओं कुशलायै नमः
ओं कोमळाकारायै नमः
ओं कुरुकुल्लायै नमः
ओं कुलेश्वर्यै नमः
ओं कुलकुण्डालयायै नमः 440
ओं कौळमार्गतत्परसेवितायै नमः
ओं कुमारगणनाथांबायै नमः
ओं तुष्ट्यै नमः
ओं पुष्ट्यै नमः
ओं मत्यै नमः
ओं धृत्यै नमः
ओं शान्त्यै नमः
ओं स्वस्तिमत्यै नमः
ओं कान्त्यै नमः
ओं नन्दिन्यै नमः 450
ओं विघ्ननाशिन्यै नमः
ओं तेजोवत्यै नमः
ओं त्रिनयनायै नमः
ओं लोलाक्षीकामरूपिण्यै नमः
ओं मालिन्यै नमः
ओं हंसिन्यै नमः
ओं मात्रे नमः
ओं मलयाचलवासिन्यै नमः
ओं सुमुख्यै नमः
ओं नळिन्यै नमः 460
ओं सुभ्रुवे नमः
ओं शोभनायै नमः
ओं सुरनायिकायै नमः
ओं काळकण्ठ्यै नमः
ओं कान्तिमत्यै नमः
ओं क्षोभिण्यै नमः
ओं सूक्ष्मरूपिण्यै नमः
ओं वज्रेश्वर्यै नमः
ओं वामदेव्यै नमः
ओं वयोवस्थाविवर्ज्जितायै नमः 470
ओं सिद्धेश्वर्यै नमः

ओं सिद्धविद्यायै नमः
ओं सिद्धमात्रे नमः
ओं यशस्विन्यै नमः
ओं विशुद्धिचक्रनिलयायै नमः
ओं आरक्तवर्णायै नमः
ओं त्रिलोचनायै नमः
ओं खट्वांगादिप्रहरणायै नमः
ओं वदनैकसमन्वितायै नमः
ओं पायसान्नप्रियायै नमः 480
ओं त्वक्स्थायै नमः
ओं पशुलोकभयङ्कर्यै नमः
ओं अमृतादिमहाशक्तिसंवृतायै नमः
ओं डाकिनीश्वर्यै नमः
ओं अनाहताब्जनिलयायै नमः
ओं श्यामाभायै नमः
ओं वदनद्वयायै नमः
ओं दंष्ट्रोज्ज्वलायै नमः
ओं अक्षमालादिधरायै नमः
ओं रुधिरसंस्थितायै नमः 490
ओं काळरात्र्यादिशक्त्यौघवृतायै नमः
ओं स्निग्धौदनप्रियायै नमः
ओं महावीरेन्द्रवरदायै नमः
ओं राकिण्यंबास्वरूपिण्यै नमः
ओं मणिपूराब्जनिलयायै नमः
ओं वदनत्रयसंयुतायै नमः
ओं वज्रादिकायुधोपेतायै नमः
ओं डामर्यादिभिरावृतायै नमः
ओं रक्तवर्णाये नमः
ओं मांसनिष्ठाये नमः 500
ओं गुडान्नप्रीतमानसायै नमः
ओं समस्तभक्तसुखदायै नमः
ओं लाकिन्यंबास्वरूपिण्यै नमः
ओं स्वाधिष्ठानांबुजगतायै नमः
ओं चतुर्वक्त्रमनोहरायै नमः
ओं शूलाद्यायुधसन्पन्नायै नमः
ओं पीतवर्णायै नमः
ओं अतिगर्वितायै नमः

ओं मेदोनिष्ठायै नमः
ओं मधुप्रीतायै नमः 510
ओं बन्दिन्यादिसमन्वितायै नमः
ओं दद्ध्यान्नासक्तहृदयायै नमः
ओं काकिनीरूपधारिण्यै नमः
ओं मूलाधारांबुजारूढायै नमः
ओं पञ्चवक्त्रायै नमः
ओं अस्थिसंस्थितायै नमः
ओं अङ्कुशादिप्रहरणायै नमः
ओं वरदादिनिषेवितायै नमः
ओं मुद्गौदनासक्तचित्तायै नमः
ओं साकिन्यंबास्वरूपिण्यै नमः 520
ओं आज्ञाचक्राब्ज निलयायै नमः
ओं शुक्लवर्ण्णायै नमः
ओं षडाननायै नमः
ओं मज्जासंस्थायै नमः
ओं हंसवतीमुख्यशक्ति समन्वितायै नमः
ओं हरिद्रान्नैकरसिकायै नमः
ओं हाकिनीरूपधारिण्यै नमः
ओं सहस्रदळपद्मस्थायै नमः
ओं सर्व्ववर्ण्णोपशोभितायै नमः
ओं सर्वायुधधराय नमः 530
ओं शुक्लसंस्तितायै नमः
ओं सर्वतोमुख्यै नमः
ओं सर्व्वौदनप्रीतचित्तायै नमः
ओं याकिन्यंबास्वरूपिण्यै नमः
ओं स्वाहायै नमः
ओं स्वधायै नमः
ओं अमत्यै नमः
ओं मेधायै नमः
ओं श्रुत्यै नमः
ओं स्मृत्यै नमः 540
ओं अनुत्तमायै नमः
ओं पुण्यकीर्त्त्यै नमः
ओं पुण्यलभ्यायै नमः
ओं पुण्यश्रवणकीर्त्तनायै नमः
ओं पुलोमजार्च्चितायै नमः

ओं बन्धमोचिन्यै नमः
ओं बर्बराळकायै नमः
ओं विमर्शरूपिण्यै नमः
ओं विद्यायै नमः
ओं वियदादिजगत्प्रसवे नमः 550
ओं सर्व्वव्याधि प्रशमन्यै नमः
ओं सर्व्वमृत्यु निवारिण्यै नमः
ओं अग्रगण्यायै नमः
ओं अचिन्त्यरूपायै नमः
ओं कलिकल्मषनाशिन्यै नमः
ओं कात्यायनै नमः
ओं कालहन्त्र्यै नमः
ओं कमलाक्षनिषेवितायै नमः
ओं तांबूलपूरितमुख्यै नमः
ओं दाडिमीकुसुमप्रभायै नमः 560
ओं मृगाक्ष्यै नमः
ओं मोहिन्यै नमः
ओं मुख्यायै नमः
ओं मृडान्यै नमः
ओं मित्ररूपिण्यै नमः
ओं नित्यतृप्तायै नमः
ओं भक्तनिधये नमः
ओं नियन्त्र्यै नमः
ओं निखिलेश्वर्यै नमः
ओं मैत्र्यादिवासनालभ्यायै नमः 570
ओं महाप्रळयसाक्षिण्यै नमः
ओं पराशक्त्यै नमः
ओं परानिष्ठायै नमः
ओं प्राज्ञानघनरूपिण्यै नमः
ओं माद्ध्वीपानालसायै नमः
ओं मत्तायै नमः
ओं मातृकावर्णरूपिण्यै नमः
ओं महाकैलासनिलयायै नमः
ओं मृणाळमृदुदोर्ल्लतायै नमः
ओं महनीयायै नमः 580
ओं दयामूर्त्त्यै नमः
ओं महासाम्राज्यशालिन्यै नमः

ओं आत्मविद्यायै नमः
ओं महाविद्यायै नमः
ओं श्रीविद्यायै नमः
ओं कामसेवितायै नमः
ओं श्रीषोडशाक्षरीविद्यायै नमः
ओं त्रिकूटायै नमः
ओं कामकोटिकायै नमः
ओं कटाक्षकिङ्करीभूतकमलाकोटिसेवितायै नमः 590
ओं शिरस्थितायै नमः
ओं चन्द्रनिभायै नमः
ओं फालस्थायै नमः
ओं इन्द्रधनुप्रभायै नमः
ओं हृदयस्थायै नमः
ओं रविप्रख्यायै नमः
ओं त्रिकोणान्तरदीपिकायै नमः
ओं दाक्षायण्यै नमः
ओं दैत्यहन्त्र्यै नमः
ओं दक्षयज्ञविनाशिन्यै नमः 600
ओं दरान्तोळितदीर्घाक्ष्यै नमः
ओं दरहासोज्ज्वलन्मुख्यै नमः
ओं गुरुमूर्त्यै नमः
ओं गुणनिधये नमः
ओं गोमात्रे नमः
ओं गुहजन्मभुवे नमः
ओं देवेश्यै नमः
ओं दण्डनीतिस्थायै नमः
ओं दहराकाश रूपिण्यै नमः
ओं प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजितायै नमः 610
ओं कलात्मिकायै नमः
ओं कलानाथायै नमः
ओं काव्यालापविनोदिन्यै नमः
ओं सचामररमावाणीसव्यदक्षिणसेवितायै नमः
ओं आदिशक्त्यै नमः
ओं अमेयायै नमः
ओं आत्मने नमः
ओं परमायै नमः
ओं पावनाकृत्यै नमः

ओं अनेककोटिब्रह्माण्डजनन्यै नमः
ओं दिव्यविग्रहायै नमः
ओं क्लींकार्यै नमः
ओं केवलायै नमः
ओं गुह्यायै नमः
ओं कैवल्यपददायिन्यै नमः
ओं त्रिपुरायै नमः
ओं त्रिजगद्वन्द्यायै नमः
ओं त्रिमूर्त्त्यै नमः
ओं त्रिदशेश्वर्यै नमः
ओं त्र्यक्षर्यै नमः 630
ओं दिव्यगन्धाढ्यायै नमः
ओं सिन्दूरतिलकाञ्चितायै नमः
ओं उमायै नमः
ओं शैलेन्द्र तनयायै नमः
ओं गौर्यै नमः
ओं गन्धर्व्वसेवितायै नमः
ओं विश्वगर्भायै नमः
ओं स्वर्णगर्भायै नमः
ओं अवरदायै नमः
ओं वागधीश्वर्यै नमः 640
ओं ध्यानगम्यायै नमः
ओं अपरिच्छेद्यायै नमः
ओं ज्ञानदायै नमः
ओं ज्ञानविग्रहायै नमः
ओं सर्व्ववेदान्त संवेद्यायै नमः
ओं सत्यानन्दस्वरूपिण्यै नमः
ओं लोपामुद्रार्च्चितायै नमः
ओं लीलाक्लुप्तब्रह्माण्डमण्डलायै नमः
ओं अदृश्यायै नमः
ओं दृश्यरहितायै नमः 650
ओं विज्ञात्र्यै नमः
ओं वेद्यवर्ज्जितायै नमः
ओं योगिन्यै नमः
ओं योगदायै नमः
ओं योग्यायै नमः
ओं योगानन्दायै नमः

ओं युगन्धरायै नमः
ओं इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिण्यै नमः
ओं सर्वाधारायै नमः
ओं सुप्रतिष्ठायै नमः 660
ओं सदसद्रूपधारिण्यै नमः
ओं अष्टमूर्त्यै नमः
ओं अजाजैत्र्यै नमः
ओं लोकयात्राविधायिन्यै नमः
ओं एकाकिन्यै नमः
ओं भूमरूपायै नमः
ओं निर्द्वैतायै नमः
ओं द्वैतवर्ज्जितायै नमः
ओं अन्नदायै नमः
ओं वसुदायै नमः 670
ओं वृद्धायै नमः
ओं ब्रह्मात्मैक्यस्वरूपिण्यै नमः
ओं बृहत्यै नमः
ओं ब्राह्मण्यै नमः
ओं ब्राह्म्यै नमः
ओं ब्रह्मानन्दायै नमः
ओं बलिप्रियायै नमः
ओं भाषारूपायै नमः
ओं बृहत्सेनायै नमः
ओं भावाभावविवर्ज्जितायै नमः 680
ओं सुखाराद्ध्यायै नमः
ओं शुभकर्यै नमः
ओं शोभनासुलभागत्यै नमः
ओं राजराजेश्वर्यै नमः
ओं राज्यदायिन्यै नमः
ओं राज्यवल्लभायै नमः
ओं राजत्कृपायै नमः
ओं राजपीठनिवेशितनिजाश्रितायै नमः
ओं राज्यलक्ष्म्यै नमः
ओं कोशनाथायै नमः 690
ओं चतुरंगबलेश्वर्यै नमः
ओं साम्राज्यदायिन्यै नमः
ओं सत्यसन्धायै नमः

ओं सागरमेखलायै नमः
ओं दीक्षितायै नमः
ओं दैत्यशमन्यै नमः
ओं सर्व्वलोकवशंकर्यै नमः
ओं सर्व्वार्त्थदात्र्यै नमः
ओं सावित्र्यै नमः
ओं सच्चिदानन्दरूपिण्यै नमः 700
ओं देशकालापरिच्छिन्नायै नमः
ओं सर्वगायै नमः
ओं सर्वमोहिन्यै नमः
ओं सरस्वत्यै नमः
ओं शास्त्रमय्यै नमः
ओं गुहांबायै नमः
ओं गुह्यरूपिण्यै नमः
ओं सर्वोपाधिविनिर्मुक्तायै नमः
ओं सदाशिवपतिव्रतायै नमः
ओं सन्प्रदायेश्वर्यै नमः 710
ओं साधुने नमः
ओं यै नमः
ओं गुरुमण्डलरूपिण्यै नमः
ओं कुलोत्तीर्ण्णायै नमः
ओं भगाराध्ययै नमः
ओं मायायै नमः
ओं मधुमत्यै नमः
ओं मह्यै नमः
ओं गणांबायै नमः
ओं गुह्यकाराध्यायै नमः 720
ओं कोमळांग्यै नमः
ओं गुरुप्रियायै नमः
ओं स्वतन्त्रायै नमः
ओं सर्वतन्त्रेश्यै नमः
ओं दक्षिणामूर्त्तिरूपिण्यै नमः
ओं सनकादिसमाराध्यायै नमः
ओं शिवज्ञानप्रदायिन्यै नमः
ओं चित्कलायै नमः
ओं आनन्दकलिकायै नमः
ओं प्रेमरूपायै नमः 730

ओं प्रियंकर्यै नमः
ओं नामपारायणप्रीतायै नमः
ओं नन्दिविद्यायै नमः
ओं नटेश्वर्यै नमः
ओं मिथ्याजगदधिष्ठानायै नमः
ओं मुक्तिदायै नमः
ओं मुक्तिरूपिण्यै नमः
ओं लास्यप्रियायै नमः
ओं लयकर्यै नमः
ओं लज्जायै नमः 740
ओं रंभादिवन्दितायै नमः
ओं भवदावसुधावृष्ट्यै नमः
ओं पापारण्यदवानलायै नमः
ओं दौर्भाग्यतूलवातूलायै नमः
ओं जराध्वान्तरविप्रभायै नमः
ओं भाग्याब्धिचन्द्रिकायै नमः
ओं भक्तचित्तकेकिघनाघनायै नमः
ओं रोगपर्वतदंभोळये नमः
ओं मृत्युदारुकुठारिकायै नमः
ओं महेश्वर्यै नमः 750
ओं महाकाळ्यै नमः
ओं महाग्रासायै नमः
ओं महाशनायै नमः
ओं अपर्ण्णायै नमः
ओं चण्डिकायै नमः
ओं चण्डमुण्डासुरनिषूदिन्यै नमः
ओं क्षराक्षरात्मिकायै नमः
ओं सर्व्वलोकेश्यै नमः
ओं विश्वधारिण्यै नमः
ओं त्रिवर्ग्गदात्र्यै नमः 760
ओं सुभगायै नमः
ओं त्र्यंबकायै नमः
ओं त्रिगुणात्मिकायै नमः
ओं स्वर्ग्गापवर्ग्गदायै नमः
ओं शुद्धायै नमः
ओं जपापुष्पनिभाकृत्यै नमः
ओं ओजोवत्यै नमः

ओं द्युतिधरायै नमः
ओं यज्ञरूपायै नमः
ओं प्रियव्रतायै नमः 770
ओं दुराराध्यायै नमः
ओं दुराधर्षायै नमः
ओं पाटलीकुसुमप्रियायै नमः
ओं महत्यै नमः
ओं मेरुनिलयायै नमः
ओं मन्दारकुसुमप्रियायै नमः
ओं वीराराध्यायै नमः
ओं विराड्रूपायै नमः
ओं विरजायै नमः
ओं विश्वतोमुख्यै नमः 780
ओं प्रत्यग्रूपायै नमः
ओं पराकाशायै नमः
ओं प्राणदायै नमः
ओं प्राणरूपिण्यै नमः
ओं मार्त्ताण्डभैरवाराध्यायै नमः
ओं मन्त्रिणीन्यस्तराज्यधुरे नमः
ओं त्रिपुरेश्यै नमः
ओं जयत्सेनायै नमः
ओं निस्त्रैगुण्यायै नमः
ओं परापरायै नमः 790
ओं सत्यज्ञानानन्दरूपायै नमः
ओं सामरस्यपरायणायै नमः
ओं कपर्द्दिन्यै नमः
ओं कलामालायै नमः
ओं कामदुहे नमः
ओं कामरूपिण्यै नमः
ओं कलानिधये नमः
ओं काव्यकलायै नमः
ओं रसज्ञायै नमः
ओं रसशेवधये नमः 800
ओं पुष्टायै नमः
ओं पुरातनायै नमः
ओं पूज्यायै नमः
ओं पुष्करायै नमः

ओं पुष्करेक्षणायै नमः
ओं परंज्योतिषे नमः
ओं परंधाम्ने नमः
ओं परमाणवे नमः
ओं परात्परायै नमः
ओं पाशहस्तायै नमः 810
ओं पाशहन्त्र्यै नमः
ओं परमन्त्रविभेदिन्यै नमः
ओं मूर्त्तायै नमः
ओं अमूर्त्तायै नमः
ओं अनित्यतृप्तायै नमः
ओं मुनिमानसहंसिकायै नमः
ओं सत्यव्रतायै नमः
ओं सत्यरूपायै नमः
ओं सर्वान्तर्यामिन्यै नमः
ओं सत्यै नमः 820
ओं ब्रह्माण्यै नमः
ओं ब्रह्मणे नमः
ओं जनन्यै नमः
ओं बहुरूपायै नमः
ओं बुधार्च्चितायै नमः
ओं प्रसवित्र्यै नमः
ओं प्रचण्डायै नमः
ओं आज्ञायै नमः
ओं प्रतिष्ठायै नमः
ओं प्रकटाकृत्यै नमः 830
ओं प्राणेश्वर्यै नमः
ओं प्राणदात्र्यै नमः
ओं पञ्चाशत्पीठरूपिण्यै नमः
ओं विशृंखलायै नमः
ओं विविक्तस्थायै नमः
ओं वीरमात्रे नमः
ओं वियत्प्रसवे नमः
ओं मुकुन्दायै नमः
ओं मुक्तिनिलयायै नमः
ओं मूलविग्रहरूपिण्यै नमः 840
ओं भावज्ञायै नमः

ओं भवरोगघ्न्यै नमः
ओं भवचक्रप्रवर्त्तिन्यै नमः
ओं चन्दस्सारायै नमः
ओं शास्त्रसारायै नमः
ओं मन्त्रसारायै नमः
ओं तलोदर्यै नमः
ओं उदारकीर्त्तये नमः
ओं उद्दामवैभवायै नमः
ओं वर्णरूपिण्यै नमः 850
ओं जन्ममृत्युजरातप्तजनविश्रान्तिदायिन्यै नमः
ओं सर्वोपनिषदुद्घुष्टायै नमः
ओं शान्त्यतीतकलात्मिकायै नमः
ओं गंभीरायै नमः
ओं गगनान्तःस्थायै नमः
ओं गर्वितायै नमः
ओं गानलोलुपायै नमः
ओं कल्पनारहितायै नमः
ओं काष्ठायै नमः
ओं अकान्तायै नमः 860
ओं कान्तार्द्धविग्रहायै नमः
ओं कार्यकारणनिर्म्मुक्तायै नमः
ओं कामकेळितरंगितायै नमः
ओं कनत्कनकताटङ्कायै नमः
ओं लीलाविग्रहधारिण्यै नमः
ओं अजायै नमः
ओं क्षयविनिर्मुक्तायै नमः
ओं मुग्धायै नमः
ओं क्षिप्रप्रसादिन्यै नमः
ओं अन्तर्मुखसमाराध्यायै नमः 870
ओं बहिर्मुखसुदुर्ल्लभायै नमः
ओं त्रय्यै नमः
ओं त्रिवर्गनिलयायै नमः
ओं त्रिस्थायै नमः
ओं त्रिपुरमालिन्यै नमः
ओं निरामयायै नमः
ओं निरालंबायै नमः
ओं स्वात्मारामायै नमः

ओं सुधासृत्यै नमः
ओं संसारपङ्कनिर्म्मग्नसमुद्धरणपण्डितायै नमः 880
ओं यज्ञप्रियायै नमः
ओं यज्ञकर्त्र्यै नमः
ओं यजमानस्वरूपिण्यै नमः
ओं धर्म्माधारायै नमः
ओं धनाद्ध्यक्षायै नमः
ओं धनधान्यविवर्द्धिन्यै नमः
ओं विप्रप्रियायै नमः
ओं विप्ररूपायै नमः
ओं विश्वभ्रमणकारिण्यै नमः
ओं विश्वग्रासायै नमः 890
ओं विद्रुमाभायै नमः
ओं वैष्णव्यै नमः
ओं विष्णुरूपिण्यै नमः
ओं अयोनये नमः
ओं योनिनिलयायै नमः
ओं कूटस्थायै नमः
ओं कुलरूपिण्यै नमः
ओं वीरगोष्ठिप्रियायै नमः
ओं वीरायै नमः
ओं नैष्कर्म्म्यायै नमः 900
ओं नादरूपिण्यै नमः
ओं विज्ञानकलनायै नमः
ओं कल्यायै नमः
ओं विदग्द्धायै नमः
ओं बैन्दवासनायै नमः
ओं तत्त्वाधिकायै नमः
ओं तत्त्वमय्यै नमः
ओं तत्त्वमर्त्थस्वरूपिण्यै नमः
ओं सामगानप्रियायै नमः
ओं सौम्यायै नमः 910
ओं सदाशिवकुटुंबिन्यै नमः
ओं सव्यापसव्यमार्ग्गस्थायै नमः
ओं सर्व्वापद्विनिवारिण्यै नमः
ओं स्वस्थायै नमः
ओं स्वभावमधुरायै नमः

ओं धीरायै नमः
ओं धीरसमर्च्चितायै नमः
ओं चैतन्यार्घ्यसमाराद्ध्ययै नमः
ओं चैतन्यकुसुमप्रियायै नमः
ओं सदोदितायै नमः 920
ओं सदातुष्टायै नमः
ओं तरुणादित्यपाटलायै नमः
ओं दक्षिणादक्षिणाराद्ध्ययै नमः
ओं दरस्मेरमुखांबुजायै नमः
ओं कौलिनीकेवलायै नमः
ओं अनर्घ्यकैवल्यपददायिन्यै नमः
ओं स्तोत्रप्रियायै नमः
ओं स्तुतिमत्यै नमः
ओं श्रुतिसंस्तुतवैभवायै नमः
ओं मनस्विन्यै नमः 930
ओं मानवत्यै नमः
ओं महेश्यै नमः
ओं मंगळाकृत्यै नमः
ओं विश्वमात्रे नमः
ओं जगद्धात्र्यै नमः
ओं विशालाक्ष्यै नमः
ओं विरागिण्यै नमः
ओं प्रगल्भायै नमः
ओं परमोदारायै नमः
ओं परामोदायै नमः 940
ओं मनोमय्यै नमः
ओं व्योमकेश्यै नमः
ओं विमानस्थायै नमः
ओं वज्रिण्यै नमः
ओं वामकेश्वर्यै नमः
ओं पञ्चयज्ञप्रियायै नमः
ओं पञ्चप्रेतमञ्चाधिशायिन्यै नमः
ओं पञ्चम्यै नमः
ओं पञ्चभूतेश्यै नमः
ओं पञ्चसंख्योपचारिण्यै नमः 950
ओं शाश्वत्यै नमः
ओं शाश्वतैश्वर्यायै नमः

ओं शर्म्मदायै  नमः
ओं शंभुमोहिन्यै नमः
ओं धरायै नमः
ओं धरसुतायै नमः
ओं धन्यायै नमः
ओं धर्म्मिण्यै नमः
ओं धर्म्मवर्द्धिन्यै नमः
ओं लोकातीतायै नमः 960
ओं गुणातीतायै नमः
ओं सर्व्वातीतायै नमः
ओं शमात्मिकायै नमः
ओं बन्धूककुसुमप्रख्यायै नमः
ओं बालायै नमः
ओं लीलाविनोदिन्यै नमः
ओं सुमंगल्यै  नमः
ओं सुखकर्यै नमः
ओं सुवेषाढ्यायै नमः
ओं सुवासिन्यै नमः 970
ओं सुवासिन्यर्च्चनप्रीतायै नमः
ओं आशोभनायै नमः
ओं शुद्धमानसायै नमः
ओं बिन्दुतर्प्पणसन्तुष्टायै नमः
ओं पूर्व्वजायै नमः
ओं त्रिपुरांबिकायै नमः
ओं दशमुद्रासमाराद्ध्यायै नमः
ओं त्रिपुराश्रीवशंकर्यै नमः
ओं ज्ञानमुद्रायै नमः
ओं ज्ञानगम्यायै नमः 980
ओं ज्ञानज्ञेयस्वरूपिण्यै नमः
ओं योनिमुद्रायै नमः
ओं त्रिखण्डेश्यै नमः
ओं त्रिगुणायै नमः
ओं अंबायै नमः
ओं त्रिकोणगायै नमः
ओं अनघायै नमः
ओं अद्भुतचारित्रायै नमः
ओं वाञ्छितार्त्थप्रदायिन्यै नमः

ओं अभ्यासातिशयञ्जातायै नमः 990
ओं षडद्ध्वातीतरूपिण्यै नमः
ओं अव्याजकरुणामूर्त्तये नमः
ओं अज्ञानध्वान्तदीपिकायै नमः
ओं आबालगोपविदितायै नमः
ओं सर्व्वानुल्लंघ्यशासनायै नमः
ओं श्रीचक्रराजनिलयायै नमः
ओं श्रीमत्त्रिपुरसुन्दर्यै नमः
ओं श्रीशिवायै नमः
ओं शिवशक्त्यैक्यरूपिण्यै नमः
ओं श्रीलळितंबिकायै नमः

इति श्री लळिता देव्य नाम्नां साहस्रकं जगुः

ओं सर्व्व मंगळमंगल्ये
शिवे सर्व्वार्त्थ साधिके
शरण्ये त्र्यंबके गौरी
नारायणी नमोस्तुते !